# श्रीमद् भगवद् गीताŚrīmad Bhaga-vad Gī-tā

## Chapter 12

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ द्वादशोऽध्यायः। | a-tha dvā-da-śo'dhyā-yaḥ \| |
| भक्तियोगः। | bhak-ti-yo-gaḥ \| |

अर्जुन उवाच। — ar-ju-na u-vāca |

एवं सततयुक्ता ये — e-vaṁ sa-ta-ta-yuk-tā ye

भक्तास्त्वां पर्युपासते। — bhak-tās-tvāṁ par-yu-pā-sa-te |

ये चाप्यक्षरमव्यक्तम् — ye cāp-yak-ṣa-ram-av-yak-tam

तेषां के योगवित्तमाः॥ १॥ — te-ṣāṁ ke yo-ga-vit-ta-māḥ || 12-1 ||

| | |
|---|---|
| श्रीभगवानुवाच । | śrī-bha-ga-vān-u-vā-ca \| |
| मय्यावेश्य मनो ये माम् | may-yā-veś-ya ma-no ye mām |
| नित्ययुक्ता उपासते । | nit-ya-yuk-tā u-pā-sa-te \| |
| श्रद्धया परयोपेताः | śrad-dha-yā pa-ra-yo-pe-tāḥ |
| ते मे युक्ततमा मताः ॥ २ ॥ | te me yuk-ta-ta-mā ma-tāḥ \|\| 12-2 \|\| |
| | |
| ये त्वक्षरमनिर्देश्यम् | ye tvak-ṣa-ram-anir-deś-yam |
| अव्यक्तं पर्युपासते । | av-yak-taṁ par-yu-pā-sa-te \| |
| सर्वत्रगमचिन्त्यं च | sar-va-tra-gam-a-cin-tyaṁ ca |
| कूटस्थमचलं ध्रुवम् ॥ ३ ॥ | kū-ṭas-tham-aca-laṁ dhru-vam \|\| 12-3 \|\| |
| | |
| सन्नियम्येन्द्रियग्रामम् | san-ni-yam-yen-dri-ya-grā-mam |
| सर्वत्र समबुद्धयः । | sar-vat-ra sa-ma-bud-dha-yaḥ \| |
| ते प्राप्नुवन्ति मामेव | te prāp-nu-vanti mām-eva |
| सर्वभूतहिते रताः ॥ ४ ॥ | sar-va-bhū-ta-hi-te ra-tāḥ \|\| 12-4 \|\| |
| | |
| क्लेशोऽधिकतरस्तेषाम् | kle-śo'dhi-ka-ta-ras-te-ṣām |
| अव्यक्तासक्तचेतसाम् । | av-yak-tā-sak-ta-ce-ta-sām \| |

| | |
|---|---|
| अव्यक्ता हि गतिर्दुःखम् | av-yak-tā hi ga-tir-duḥ-kham |
| देहवद्भिरवाप्यते ॥ ५ ॥ | de-ha-vad-bhi-ra-vāp-ya-te \|\| 12-5 \|\| |
| | |
| ये तु सर्वाणि कर्माणि | ye tu sar-vā-ṇi kar-mā-ṇi |
| मयि संन्यस्य मत्पराः । | ma-yi san-nyas-ya mat-pa-rāḥ \| |
| अनन्येनैव योगेन | a-nan-ye-nai-va yo-ge-na |
| मां ध्यायन्त उपासते ॥ ६ ॥ | māṁ dhyā-yan-ta u-pā-sa-te \|\| 12-6 \|\| |
| | |
| तेषामहं समुद्धर्ता | te-ṣām-ahaṁ sa-mud-dhar-tā |
| मृत्युसंसारसागरात् । | mṛt-yu-saṁ-sā-ra-sā-ga-rāt \| |
| भवामि न चिरात्पार्थ | bha-vā-mi na ci-rāt-pār-tha |
| मय्यावेशितचेतसाम् ॥ ७ ॥ | may-yā-ve-śi-ta-ce-ta-sām \|\| 12-7 \|\| |
| | |
| मय्येव मन आधत्स्व | may-ye-va ma-na ā-dhat-sva |
| मयि बुद्धिं निवेशय । | ma-yi bud-dhiṁ ni-ve-śa-ya \| |
| निवसिष्यसि मय्येव | ni-va-siṣ-ya-si may-ye-va |
| अत ऊर्ध्वं न संशयः ॥ ८ ॥ | a-ta ūrdh-vaṁ na saṁ-śa-yaḥ \|\| 12-8 \|\| |

अथ चित्तं समाधातुम् a-tha cit-taṁ sa-mā-dhā-tum
न शक्नोषि मयि स्थिरम् । na śak-no-ṣi ma-yi sthi-ram |
अभ्यासयोगेन ततः abh-yā-sa-yo-ge-na ta-taḥ
मामिच्छाप्तुं धनञ्जय ॥ ९ ॥ mām-ic-chāp-tuṁ dha-nañ-jaya || 12-9 ||

अभ्यासेऽप्यसमर्थोऽसि abh-yā-se'p-ya-sa-mar-tho'si
मत्कर्मपरमो भव । mat-kar-ma-pa-ra-mo bha-va |
मदर्थमपि कर्माणि ma-dar-tham-api kar-mā-ṇi
कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥ kur-van-sid-dhim-avāps-yasi || 12-10 ||

अथैतदप्यशक्तोऽसि a-thai-ta-dap-ya-śak-to'si
कर्तुं मद्योगमाश्रितः । kar-tuṁ mad-yo-gam-ā-śri-taḥ |
सर्वकर्मफलत्यागम् sar-va-kar-ma-pha-la-tyā-gaṁ
ततः कुरु यतात्मवान् ॥ ११ ॥ ta-taḥ ku-ru ya-tāt-ma-vān || 12-11 ||

श्रेयो हि ज्ञानमभ्यासात् śre-yo hi jñā-nam-abh-yā-sāt
ज्ञानाद्ध्यानं विशिष्यते । jñā-nād-dhyā-naṁ vi-śiṣ-ya-te |
ध्यानात्कर्मफलत्यागः dhyā-nāt-kar-ma-pha-la-tyā-gaḥ

| | |
|---|---|
| त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥ | tyā-gāc-chān-ti-ra-nan-ta-ram \|\| 12-12 \|\| |
| अद्वेष्टा सर्वभूतानाम् | ad-veṣ-ṭā sar-va-bhū-tā-nāṁ |
| मैत्रः करुण एव च । | mai-traḥ ka-ru-ṇa eva ca \| |
| निर्ममो निरहङ्कारः | nir-ma-mo ni-ra-haṅ-kā-raḥ |
| समदुःखसुखः क्षमी ॥ १३ ॥ | sa-ma-duḥ-kha-su-khaḥ kṣa-mī \|\| 12- 13 \|\| |
| सन्तुष्टः सततं योगी | san-tuṣ-ṭaḥ sa-ta-taṁ yo-gī |
| यतात्मा दृढनिश्चयः । | ya-tāt-mā dṛ-ḍha-niś-ca-yaḥ \| |
| मय्यर्पितमनोबुद्धिः | may-yar-pi-ta-ma-no-bud-dhiḥ |
| यो मद्भक्तः स मे प्रियः ॥ १४ ॥ | yo mad-bhak-taḥ sa me pri-yaḥ \|\| 12-14\|\| |
| यस्मान्नोद्विजते लोकः | yas-mān-no-dvi-ja-te lo-kaḥ |
| लोकान्नोद्विजते च यः । | lo-kān-no-dvi-ja-te ca yaḥ \| |
| हर्षामर्षभयोद्वेगैः | har-ṣā-mar-ṣa-bha-yod-ve-gaiḥ |
| मुक्तो यः स च मे प्रियः ॥ १५ ॥ | muk-to yaḥ sa ca me pri-yaḥ \|\| 12-15 \|\| |
| अनपेक्षः शुचिर्दक्षः | ana-pek-ṣaḥ śu-cir-dak-ṣaḥ |

उदासीनो गतव्यथः । u-dā-sī-no ga-ta-vya-thaḥ |

सर्वारम्भपरित्यागी sar-vā-ram-bha-pa-ri-tyā-gī

यो मद्भक्तः स मे प्रियः ॥ १६ ॥ yo mad-bhak-taḥ sa me pri-yaḥ || 12-16||

यो न हृष्यति न द्वेष्टि yo na hṛṣ-ya-ti na dveṣ-ṭi

न शोचति न काङ्क्षति । na śo-ca-ti na kāṅ-kṣa-ti |

शुभाशुभपरित्यागी śu-bhā-śu-bha-pa-ri-tyā-gī

भक्तिमान्यः स मे प्रियः ॥ १७ ॥ bhak-ti-mān-yaḥ sa me pri-yaḥ || 12-17 ||

समः शत्रौ च मित्रे च sa-maḥ śat-rau ca mit-re ca

तथा मानापमानयोः । ta-thā mā-nā-pa-mā-na-yoḥ |

शीतोष्णसुखदुःखेषु śī-toṣ-ṇa-su-kha-duḥ-khe-ṣu

समः सङ्गविवर्जितः ॥ १८ ॥ sa-maḥ saṅ-ga-vi-var-ji-taḥ || 12-18 ||

तुल्यनिन्दास्तुतिर्मौनी tul-ya-nin-dā-stu-tir-mau-nī

सन्तुष्टो येन केनचित् । san-tuṣ-ṭo ye-na ke-na-cit |

अनिकेतः स्थिरमतिः ani-ke-taḥ sthi-ra-ma-tiḥ

भक्तिमान्मे प्रियो नरः ॥ १९ ॥ bhak-ti-mān-me pri-yo na-raḥ || 12-19 ||

ये तु धर्म्यामृतमिदम् ye tu dhar-myā-mṛ-tam-idaṁ

यथोक्तं पर्युपासते । ya-thok-taṁ par-yu-pā-sa-te |

श्रद्दधाना मत्परमाः śrad-da-dhā-nā mat-pa-ra-māḥ

भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥ bhak-tās-te'-tī-va me pri-yāḥ || 12-20 ||



| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायाम् | brahma-vid-yā-yām |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| भक्ति योगो नाम | bhak-ti yo-go nā-ma |
| द्वादशोऽध्यायः। | dvā-da-śo'dhyā-yaḥ \| |
| ॐ हरिःॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ | hariḥ om |
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज। | mām-ekaṁ śara-ṇaṁ vra-ja \| |
| अहं त्वा सर्वपापेभ्यः | ahaṁ tvā sar-va-pā-pebh-yaḥ |
| मोक्षयिष्यामि मा शुचः॥ १८-६६॥ | mokṣa-yiṣ-yā-mi mā śu-caḥ \|\| 18-66 \|\| |

## श्री कृष्णार्पणमस्तु

Śrī kṛṣ-ṇār-paṇam-astu